## ११.५ ध्वनेः पदप्रकाशतायाः औचित्यम्

तृतीयस्य उद्योतस्य अस्मिन् एकादशे पाठे व्यञ्जकतामुखेन भवान् ध्वनेः भेदानाम् अध्ययनं कृतवान्। तत्र भवता पठितमेव यत् प्रथमं ध्वनेः द्वौ भेदौ भवतः अविवक्षितवाच्यध्वनिः विवक्षितान्यपरवाच्यध्वनिश्च। तत्र अविवक्षितवाच्यध्वनेः अर्थान्तरसङ्क्रमितम् अत्यन्ततिरस्कृत-मिति भेदद्वयं पदप्रकाशतावाक्यप्रकाशताभ्यां च दृष्टिभ्यां व्याख्यातम्। ततः विवक्षितान्यपरवाच्यस्य यः संलक्ष्यक्रमव्यङ्ग्यः, तस्यापि द्वौ भेदौ कृत्वा, शब्दशक्त्युत्थस्य, अर्थशक्त्युत्थस्य अपि कविप्रौढोक्तिसिद्ध–स्वतःसम्भविनोः भेदयोः सोदाहरणं पदप्रकाशता–वाक्यप्रकाशता च प्रदर्शिता।

इदानीं व्यञ्जकमुखेन विहितयोः पदप्रकाशतावाक्यप्रकाशतारूपयोः द्वयोः भेदयोः विषये ग्रन्थकारः स्वयमेव पूर्वपक्षं उत्थायपति। ततश्च तस्य समाधानं करोति।

### ११.५.१ पदप्रकाशतायाः औचित्ये पूर्वपक्षः

प्रश्नस्य आशयः अस्ति- यद् ध्वनिः काव्यविशेषः अस्ति। तथा चोक्तं- स्वयमेव आनन्दवर्धनेन प्रथमोद्योतस्य कारिकायाम्-

**यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।**
**व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः।।१.१३।।**

तर्हि सम्पूर्णे- ध्वनिकाव्ये केवलं ध्वनेः पदप्रकाश्यत्वं कथं भवितुमर्हति?

---

**मूलग्रन्थः**

**''ननु ध्वनिः काव्यविशेषः इत्युक्तं तत्कथं तस्य पदप्रकाशता? काव्यविशेषो हि विशिष्टार्थप्रतिपत्तिहेतुः शब्दसन्दर्भविशेषः। तद् ध्वनेः पदप्रकाशत्वं नोपपद्यते। पदानां स्मारकत्वेनावाचकत्वात्।।**

---

**व्याख्या–** अयं भावः- प्रथमे उद्योते काव्यविशेषो ध्वनिः इत्युक्तं चेत्तदा कथं ध्वनेः पदप्रकाशता अङ्गीक्रियते। काव्यं तु विशिष्टस्य अर्थस्य प्रतिपत्तौ ज्ञाने हेतु भूतः शब्दार्थसन्दर्भरूपः अस्ति। तत्र पदव्यञ्जकता कथं? यतोहि पदानि पदार्थस्य स्मारकमात्राणि न तु वाचकानि। अतः पदार्थसंसर्गरूपस्य वाक्यार्थस्य वाचकानि भवितुं नार्हन्तीति भावः।

Scanned with CamScanner

**बोधप्रश्नः**

३५. पदानां स्मारकत्वेनावाचकत्वाद् इत्यस्य कोऽर्थः?

३६. विशिष्टार्थप्रतिपत्तिहेतुरित्यस्य कोऽर्थः?

## ११.५.२ पदप्रकाशतायाः औचित्ये उत्तरपक्षः

पूर्वपक्षरूपेण उत्थापितायाः शङ्कायाः समाधानं ग्रन्थकारः द्वाभ्यां युक्तिभ्यां करोति। तत्र प्रथमं समाधानमस्ति- पदानि स्मारकानि भवन्ति। वाचकानि न भवन्ति इति सर्वविदितमस्ति। परन्तु ध्वनेः व्यवहारः पदानां वाचकत्वेन न भवति। अपितु पदानां स्मारकत्वेन भवति। अतः यदि वाचकत्वमात्रेण ध्वनिव्यवहारः स्यात्तदा पदानां वाचकत्वाभावाद् ध्वनेः पदप्रकाशता न स्यात्। किन्तु ध्वनेः व्यवहारस्य नियामकं (प्रयोजकं) वाचकत्वं नास्ति, अपितु व्यञ्जकत्वमेव अस्ति। अतः पदानां वाचकत्वाभावेऽपि स्मारकत्वमात्रेणैव तेषां व्यञ्जकत्वे काचित् क्षतिः नास्ति इति।

द्वितीयं समाधानमस्ति- यत् शरीरिणां नायकानां नायिकादीनासु अवयवसंघटनानां विद्यमानासु अपि सौन्दर्यस्य प्रतीतिः मुखादिना केनापि अङ्गविशेषेणैव भवति। किन्तु व्यवहारः सम्पूर्णेऽपि अवयवसमुदाये भवति। तथैव वाक्यरूपाणां पदसमुदायानां व्यञ्जकत्वेऽपि ध्वनिव्यवहारः केनापि एकेन पदविशेषेणैव भवतीति भावः।

---

**मूलग्रन्थः**

**उच्यते। स्यादेष दोषो यदि वाचकत्वं प्रयोजकं ध्वनिव्यवहारे स्यात्। न त्वेवम्। तस्य व्यञ्जकत्वेन व्यवस्थापनात्। किञ्च, काव्यानां शरीरिणामिव संस्थानविशेषावच्छिन्न-समुदायसाध्यापि चारुत्वप्रतीतिरन्वयव्यतिरेकाभ्यां भागेषु कल्प्यत इति पदानामपि व्यञ्जकत्वमुखेन व्यवस्थितो ध्वनिव्यवहारो न विरोधी।**

**अनिष्टस्य श्रुतिर्यद्वदापादयति दुष्टताम्।**
**श्रुतिदुष्टादिषु व्यक्तं तद्वदिष्टस्मृतिर्गुणान्।।**

**पदानां स्मारकत्वेऽपि पदमात्रावभासिनः।**
**तेन ध्वनेः प्रभेदेषु सर्वेष्वेवास्ति रम्यता।।**

**विच्छित्तिशोभिनैकेन भूषणेनेव कामिनी**
**पदद्योत्येन सुकवेर्ध्वनिना भाति भारती।।**

---

**व्याख्या-** अयं भावः यदि वाचकत्वमेव ध्वनौ प्रयोजकं कारकं वा स्यात् तदा पदप्रकाशतायाः स्वीकारे दोषस्य अवतारः स्यात्। किन्तु तस्य ध्वनिव्यवहारस्य व्यञ्जकत्वेन = पदानां व्यञ्जकतया व्यवस्थानात् व्यवस्थितो भवति। अतः ध्वनिकाव्ये पदानां व्यञ्जकत्वस्वीकारे कश्चन दोषो नास्ति। किन्तु अमुम् उत्तरं लोचनकारः छलोत्तरमिति ब्रूते। उक्तञ्च लोचने- ''सोऽयमप्रयोजको हेतुरिति छलेन ...इत्यादि एवं छलेन परिहृत्य वस्तुवृत्तेन द्वितीयेन उत्तरेण परिहरति। तथाहि-

यथा शरीरिणां नायकानां नायिकादीनां सौन्दर्यस्यावगतिः। अन्वयव्यतिरेकाभ्यां=तत्सत्त्वे तत्सत्त्वमन्वय, तदभावे तदभावः व्यतिरेकः इतिरूपाभ्याम् अन्वयव्यतिरेकाभ्यां, भागेषु=भागविशेषेषु कल्प्यते, इति=एतस्मात् कारणात् पदानामपि=सार्थकवर्णसमुदायानामपि व्यञ्जकत्वमुखेन= व्यञ्जकतया, व्यवस्थितः=सिद्धान्तितः ध्वनिव्यवहारः। अर्थात् पदप्रकाश्योपि ध्वनिर्भवति इत्येवं

Scanned with CamScanner

विध: व्यवहार: न विरोधी=सिद्धान्तविरुद्धो नास्तीति भाव:। अमुमेव सिद्धान्तं त्रिभि: परिकरश्लोकै: द्रढयति आचार्य: आनन्दवर्धन:-

यद्वद् अनिष्टस्य 'पाणिपल्लवपेलव' इत्यादिषु वाक्येषु अनीप्सितस्य पेलवादिपदस्य, श्रुति: श्रवणं दुष्टतां=काव्यदोषताम्, आपादयति=सम्पादयति। तद्वत्=तथैव, व्यक्तम् इष्टपदस्मृति: गुणम् आपादयति। अर्थात् यथा दुष्टानां पदानां वर्णानां वा प्रयोग: असभ्यार्थस्य स्मारकतया दोषो भवति तथैव सभ्यार्थप्रयोजकानां पदानां वर्णानां वा प्रयोग: गुणाय परिकल्प्यत इति भाव:।

एवं पदानां स्मारकत्वेऽपि, पदमात्रावभासिन: केवलम् एकेन पदमात्रेणापि प्रतीयमाना: चारुत्वं धारयन्ति। लोके यथा विच्छित्तिशोभिना=विशेषशोभाशालिना एकेनैव भूषणेन=अलङ्कारेण कामिनी=रमणी शोभातिशयं पुष्णाति तथैव पदद्योत्येन=पदमात्रप्रकाशकेन ध्वनिना अपि सुकवे: महाकवे: भारती=सरस्वती भाति=शोभते। एवं काव्येषु ध्वनि: पदमात्रप्रकाश्य: अपि भवतीति तात्पर्यार्थ:।

**बोधप्रश्न:**

३६. ध्वनिव्यवहारे पदानां वाचकत्वं स्मारकत्वं वेति किं गृह्यते?

३७. अन्वयव्यतिरेकाभ्यां चारुत्वप्रतीति: इत्यस्य कोऽभिप्राय:?

३८. सुकवे: भारती केन भाति?

## ११.६ सारांश:

अस्मिन् पाठे सर्वप्रथमं ध्वने: अविवक्षितवाच्यस्य द्वौ भेदौ उक्तौ। तत्र प्रथमस्य अत्यन्ततिरस्कृतवाच्यस्य पदप्रकाशताया: त्रीणि उदाहरणानि प्रदत्तानि, पुनश्च द्वितीयस्य अर्थान्तरसङ्क्रमितवाच्यस्य द्वे उदाहरणे प्रस्तुते। पुनश्च अनयो: द्वयो: भेदयो: क्रमेण वाक्यप्रकाशताया: एकैकमुदाहरणं प्रस्तुतम्। एवमविवक्षितवाच्यस्य पदवाक्यप्रकाशताभेदै: चतुरो विभागान् कृतवान्।

अत: परं विवक्षितान्यपरवाच्यस्य असंलक्ष्यक्रमव्यङ्ग्य-संलक्ष्यक्रमव्यङ्ग्यभेदयो: संलक्ष्यक्रमव्यङ्ग्यस्य प्रथमं शब्दशक्त्युत्थ: अर्थशक्त्युत्थ: उभयशक्त्युत्थ इति त्रीन् भेदान् विधाय शब्दशक्त्युत्थस्य पदवाक्यप्रकाशताभ्यां द्वौ भेदौ उदाहृत्य अर्थशक्त्युत्थस्य स्वत:सम्भवी, कविप्रौढोक्तिसिद्ध: कविनिबद्धवक्तृप्रौढोक्तिसिद्धश्चेति त्रीन् भेदान् कृतवान्। पुनश्च कविप्रौढोक्ति-सिद्धस्य पदवाक्यप्रकाशतयो: द्वे उदाहरणे प्रस्तूय कविनिबद्धवक्तृप्रौढोक्तिसिद्धस्य, तस्मिन्नेव कविप्रौढोक्तिसिद्धे भेदे गतार्थतामकरोत्। किन्तु मया अस्य भेदस्य लोचनानुसारेण द्वे उदाहरणे प्रस्तुते। अनन्तरमेव स्वत:सम्भवि- पदवाक्यप्रकाशतयो: द्वे उदाहरणे प्रस्तुते ग्रन्थकारेण।

अनन्तरम् ध्वनि: काव्यविशेष:, तर्हि कथं ध्वने: पदप्रकाश्यत्वमिति पूर्वपक्षमुपस्थाप्य ग्रन्थकारेण द्वाभ्यां प्रकाराभ्यां द्विर्बद्धं सुबद्धं भवतीति न्यायेन समाहितम्।

## ११.७ शब्दावली

| | | | |
|---|---|---|---|
| १. | व्यङ्ग्यम् | - | यद् व्यज्यते तद् व्यङ्ग्यम्, अर्थात् व्यञ्जनया बोध्य: व्यङ्ग्य: अर्थ: अस्ति। |
| २. | व्यञ्जकम् | - | यद् व्यनक्ति तद् व्यञ्जकम्, अर्थात् व्यञ्जक: शब्दोऽपि भवति अर्थोऽपि। |

Scanned with CamScanner

३. पदप्रकाशता = पदस्य सुबन्तस्य तिङन्तस्य वा पदस्य प्रकाशता व्यञ्जकत्वम्।

४. वाक्यप्रकाशता = यः व्यङ्ग्यार्थः वाक्यात् प्रकाशते तस्य भावः, अर्थात् वाक्यस्य व्यञ्जकता इत्यर्थः।

५. समिधः = यज्ञीयकाष्ठानि।

६. परमार्थविचारः = यथार्थविचारः, परमश्चासौ अर्थः परमार्थः, तस्य विचारः।

७. तत्त्वज्ञानावहितत्वम् = तत्त्वज्ञाने सावधानत्वम्।

८. सामानाधिकरण्यम् = समानम् अधिकरणं ययोः येषामिति वा समानाधिकरणं तस्य भावः।

९. शेषः = इदं श्लिष्टं पदम्। शेषः शेषनागः, अवशिष्टो वा।

१०. शब्दशक्तिः = शब्दे विद्यमाना अभिधा शक्तिः।

११. अर्थशक्तिः = अर्थे विद्यमाना व्यञ्जना शक्तिः।

१२. कविप्रौढोक्तिः = कवेः प्रौढा उक्तिः यत्र सा कविप्रौढोक्तिः।

१३. कविनिबद्धवक्तृप्रौढोक्तिः - कविना स्वकाव्ये निबद्धः य वक्ता तस्य प्रौढा उक्तिः।

१४. स्वतःसम्भवी: - लोके सम्भवि काव्ये वर्णितं च स्वतः सम्भवीति कथ्यते।

१५. संस्थानम् - अवयवः।

१६. विच्छित्तिः - सौन्दर्यम्, चारुत्वम्।

१७. अविच्छन्नम् - विशिष्टम्। युक्तम्

१८. स्मारकम् - स्मृतेः जनकम्।

## ११.८ सन्दर्भग्रन्थः


१. ध्वन्यालोकः- व्याख्याकारः-आचार्यजगन्नाथपाठकः प्रकाशकः चौखम्बा विद्याभवनम्, वाराणसी, १९९२ संस्करणम्

२. ध्वन्यालोकः- आचार्यविश्वेश्वरः, ज्ञानमण्डललिमिटेड, लङ्का वाराणसी-१९९८।


## ११.९ सहायकग्रन्थः


१. काव्यप्रकशः = आचार्यमम्मटः

२. व्यक्तिविवेकः = महिमभट्टः

३. काव्यशास्त्रस्येतिहासः = पी.वी. काणे


Scanned with CamScanner

४. साहित्यदर्पण: = आचार्यविश्वनाथ:

## ११.१० बोधप्रश्नोत्तराणि

१. कस्मिंश्चित् काव्ये यदा एकेन व्यञ्जकेन पदेन ध्वन्यर्थ: प्रकाशते तदा पदप्रकाशता, यदा च सम्पूर्णेन वाक्येन व्यङ्ग्यार्थ: प्रकाशते तदा वाक्यप्रकाशता च भवति।

२. पदं व्यङ्ग्यार्थस्य वाचकं न भवति, स्मारकमेव भवति।

३. रणनं ध्वनि:, ध्वने: अनन्तरं य: अपर: ध्वनि: श्रूयते स प्रतिध्वनि: इत्युच्यते:। प्रतिध्वनि: एव अनुरणनमित्युच्यते। एवम् अनुरणनरूपं व्यङ्ग्यं लक्ष्यबोधक्रमं यस्मिन् स ध्वनि: इत्यर्थ:।

४. ससैता: समिध: श्रिय: इत्यत्र अनुष्टुपाछन्द:। तल्लक्षणं पूर्वमुक्तम्।

५. इदं पद्यम् अभिज्ञानशाकुन्तलस्य तृतीयाङ्काद् उद्धृतम्।

६. क: सन्नद्धे इत्यत्र सन्नद्धे इत्यस्य पदस्य मुख्यार्थो भवति सम्यबद्ध: इति लक्ष्यार्थो भवति उद्यत इति।

७. यत्र ध्वनौ वाच्यार्थ: अर्थान्तरे सङ्क्रमितो भवति स: अर्थान्तरसङ्क्रमित-वाच्यध्वनि: इत्युच्यते।

८. रामेण प्रियजीवितेन इत्यत्र रामेण इत्येतस्य पदस्य वाच्यार्थ: दशरथापत्यरूप: इति भवति। साहसैकरसो राम:, सुखदु:खसहिष्णु: राम: इत्येवं रूप: अर्थ: रामपदस्य अर्थान्तरसङ्क्रमिततया प्रतीयते।

९. चन्द्रश्चन्द्र: पुन: वराक: इत्यत्र द्वितीयं चन्द्रपदं जडत्वमलिनत्वविशिष्टस्य चन्द्रस्य बोधकम्। अत्र चन्द्रपदमेव ध्वने: प्रकाशकमिति पदप्रकाशता।

१०. रामेण प्रियजीवितेन इत्यत्र शार्दूलविक्रीडितम् छन्द:, लक्षणं पूर्वोक्तम्।

११. वाच्यार्थ: रात्रिरूप: जागरणरूपश्च। व्यङ्ग्यार्थ: तत्त्वज्ञानावहितत्वम् अतत्त्वपराङ्मुखत्वञ्च अस्ति।

१२. तत्त्वज्ञानेन ब्रह्मज्ञानेन अवहितत्वं=सावधानत्वं युक्तत्वम्। अर्थाद् ब्रह्मज्ञानयुक्त-मित्यर्थो भवति।

१३. सम्पूर्णस्यापि श्लोकस्य वाच्यार्थे ज्ञाते अर्थशक्त्या तत्त्वज्ञानयुक्तत्वरूपोऽर्थ: सम्पूर्णस्य वाक्यार्थस्य अवगतो भवति। अत: वाक्यप्रकाशता।

१४. निशार्थ: अत्यन्तं तिरस्कृत: सन् तत्त्वपराङ्मुखत्वरूपमर्थं प्रकटयति, 'जाग्रति' इति पदं जागरणरूपमर्थं तिरस्कृत्य तत्त्वज्ञानावहितत्वरूपमर्थं प्रकयति इति अत्यन्ततिरस्कृतवाच्यत्वम्।

१५. विषशब्देन दु:खरूपोऽर्थ:, अमृतशब्देन सुखरूपोऽर्थश्च गृह्यते।

१६. उभयात्मक: काल: अर्थात् दु:खसुखरूपात्मक: काल: विवेकाविवेकवतां कृते निर्धारित: कविना।

१७. योगभूमिमुपगता: सिद्धा: ये भवन्ति ते सांसारिकसुखदु:खेभ्य: उपरता: भवन्ति।

Scanned with CamScanner

अतः तेषां कृते कालः न सुखमयः न वा दुःखमयः भवति।

१८. जडपदं श्लिष्टम्। अतः कूपेन संगतं सत् शीतलत्वादेः बोधकम् अहमित्यनेन संगतं सत् मूर्खत्वादेर्बोधकम्। यदा शीतलत्वादेर्बोधकं तदा कूपस्य विशेषणम्।

१९. अनुरणनम्-अनुस्वानाभं व्यङ्ग्यम्। संलक्ष्यक्रमव्यङ्ग्ये अर्थशक्त्युत्थध्वनिः अनुरणनरूपव्यङ्ग्यमित्युच्यते।

२०. शब्दानां शक्तिः व्यापारः शब्दशक्तिः। तस्माद् उद्भवः शब्दशक्त्युद्भवः अयमेव शब्दशक्त्युत्थ इति कथ्यते।

२१. इदं वाक्यं हर्षचरितमिति गद्यकाव्याद् उद्धृतम्। अस्य गद्यकाव्यस्य प्रणेता महाकविः बाणभट्टो विद्यते।

२२. अत्र न केवलं शेषपदेन व्यङ्ग्यार्थप्रतीतिः, अपितु सम्पूर्णादपि वाक्यादिति वाक्यप्रकाशता।

२३. 'चूताङ्कुरावतंसमित्यत्र' असमर्पितमिति पदाद् विशेषरूपः व्यङ्ग्यार्थः प्रतीयते इति पदप्रकाशता अस्मिन् पद्ये वर्तते।

२४. अत्र पद्ये वर्णितमस्ति यद् वसन्तऋतुः बाणान् निर्माति, परं कामम् न समर्पयति। एवं लोके न भवति, वसन्तः जडः तथैव कामोऽपि नीरूपः वर्तते। अत लोकसिद्धोऽयं विषयो नास्ति। अथापि स्वप्रतिभावलेन मानवीकरणप्रवृत्त्या वर्णितम्। अतोऽत्र कविप्रौढोक्तिसिद्धः। अथ च वाक्यार्थबोधानन्तरम् असमर्पितमित्यत्र अर्थशक्त्या विशेषार्थो बोध्यते इति अर्थशक्त्युत्थकविप्रौढोक्ति-सिद्धा पदप्रकाशता।

२५. आर्यावृत्तम्। लक्षणमुक्तम् प्राक्। भवता तत्रैव अवलोकनीयम्।

२६. अत्रापि सम्पूर्णस्य वाक्यार्थस्य बोधानन्तरम् अनेकैः पदैः अर्थशक्त्या व्यङ्ग्यार्थः प्रतीयते इति वाक्यप्रकाशता।

२७. वसन्ते कामोद्दीपनं विरहिणां पीडनं च।

२८. प्रथमम् अभिधया वाक्यार्थबोधो भवति। सति वाक्यार्थबोधे यत्र वाक्यार्थाद् अर्थशक्त्या व्यञ्जनया व्यङ्ग्यार्थः प्रतीयते तत्र अर्थशक्त्युत्थध्वनिर्भवति।

२९. लुलितालकमुखी इत्यस्य पदस्य अभिधेयार्थबोधे जाते अर्थशक्त्या व्यङ्ग्यार्थः प्रतीयते। स च वाक्यार्थः यथा लोके भवति तथैव कविना अत्र निबद्धः न हि किमपि प्रतिभोत्थितं वस्तु निबद्धमिति स्वतःसम्भवी।

३०. लुलित चासौ अलकः इति लुलितालकः, लुलितालकं मुखं यस्याः सा लुलितालकमुखी।

३१. अत्र केवलं लुलितालकमुखी इति पदार्थबोधेन विशेषतः व्यङ्ग्यार्थोऽवगम्यते इति पदप्रकाशता।

३२. सौभाग्यातिशयः।

३३. आर्या छन्दः। इदं मात्रिकं छन्दः, लक्षणं पूर्वमुक्तम्।

३४. लोके यथा विद्यते तथैव अस्मिन् पद्ये वर्णितम् इति स्वतः सम्भवित्वम्।

Scanned with CamScanner

३५. पदानि पदार्थस्य स्मारकाणि भवन्ति वाचकानि न भवन्ति। अत: पदे द्योतकता कथं स्यात्– इत्यस्य अर्थ:।

३६. विशेषणेन युक्त: अर्थ: विशिष्टार्थ: इति कथ्यते, तस्य अर्थस्य प्रतिपत्तौ कारणम्। अर्था: विशेषस्यार्थस्य बोधकारणम् इत्यर्थ:।

३७. ध्वनिव्यवहारे पदानां स्मारकत्वं गृह्यते।

३८. तत्सत्त्वे तत् सत्त्वमिति अन्वय:। तदभावे तदभाव: इति व्यतिरेक।: यत्र कस्यचित् शब्दविशेषस्य सत्तायां चारुत्वप्रतीति:, तथा तस्य शब्दस्य अभावे अचारुत्वप्रतीति: चारुत्वप्रतीते हेतु: स शब्द: भवति।

३९. पदद्योत्येन ध्वनिना।

## ११.११ अभ्यासप्रश्ना:

१. ध्वन्यालोकस्य एकादशस्य पाठस्य अनुसारेण अविवक्षितवाच्य ध्वने: पद-वाक्यप्रकाशतयो: विवेचनं विधेयम्।

२. या निशा सर्वभूतानामित्यस्मिन् पद्ये का वाक्यप्रकाशता?

३. विषमयित: केषामपीति पद्यं व्याख्याय व्यङ्ग्यार्थस्य निर्धारणं करोतु।

४. ध्वनिकाव्ये पदप्रकाशताया: औचित्ये किं समाहितमाचार्येण?

५. पदानां स्मारकत्वेन वाचकत्वादित्यस्य कोऽभिप्राय:?

६. विच्छित्तिशोभिनैकेन भूषणेनेव कामिनीति कारिकांश: विव्रियताम्?

—•—

Scanned with CamScanner